पदार्थः—हे यथार्थवक्ता विद्वानो जैसे हम लोग ( वः ) आपके ( अध्वरस्य ) न नष्ट करने योग्य राज्य के ( अवसे ) धर्मात्माओं की रक्षा और दुष्टों के नाश करने के लिये ( होतारम् ) देने ( सत्ययजम् ) सत्य ही को प्राप्त होने और ( रुद्रम् ) दुष्टों के रुलाने वाले ( अचित्तात् ) जिस में चित्त नहीं स्थिर होता ऐसी ( तनयित्नोः ) बिजुली के ( हिरण्यरूपम् ) तेजरूप के समान रूपवाले वा ( रोदस्योः ) अन्तरिक्ष और पृथिवी के मध्य में ( अग्निम् ) सूर्य्य के सदृश ( राजानम् ) प्रकाशमान न्याय ( पुरा ) प्रथम करें वैसा हम लोगों के बीच राजा आप लोग ( आ, कृणुध्वम् ) सब प्रकार करें ॥ १ ॥

भावार्थः—इस मंत्र में वाचकलु०—हे विद्वान् लोगो ! राजा और प्रजाजनों के साथ एकसम्मति कर के जैसे ईश्वर ने ब्रह्माण्ड के मध्य में सूर्य्य को स्थित कर के सब का प्रियसुख साधन किया वैसे ही हम लोगों के मध्य में उत्तम गुण कर्म और स्वभावयुक्त को राजा कर के हम लोगों के हित को आप लोग सिद्ध करो जिस से आप लोगों का भी प्रिय सिद्ध होवे ॥ १ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ॥

**अयं योनिश्चकृमा यं वयं ते जायेव पत्य उशती सुवासाः ।**
**अर्वाचीनः परिवीतो नि षीदेमा उ ते स्वपाक प्रतीचीः ॥ २ ॥**

अयम् । योनिः । चकृम । यम् । वयम् । ते । जायाऽइव । पत्ये । उशती । सुऽवासाः । अर्वाचीनः । परिऽवीतः । नि । सीद । इमाः । ऊँ इति । ते । सुऽअपाक । प्रतीचीः ॥ २ ॥

पदार्थः—( अयम् ) ( योनिः ) गृहम् ( चकृम ) कुर्य्याम । अत्र संहितायामिति दीर्घः ( यम् ) प्रासादम् ( वयम् ) ( ते ) तव ( जायेव ) हृद्या स्त्रीव ( पत्ये ) स्वामिने ( उशती ) कामयमाना ( सुवासाः ) शोभनवस्त्रालङ्कृता ( अर्वाचीनः ) इदानीन्तनः ( परिवीतः ) सर्वतो व्याप्तशुभगुणः ( नि ) ( सीद ) निवस ( इमाः ) वर्त्तमानाः प्रजाः ( उ ) ( ते ) तव ( स्वपाक ) सुष्ठ्वपरिपक्वज्ञान ( प्रतीचीः ) प्रतीतमञ्चन्त्यः ॥ २ ॥

अन्वयः—हे राजन् वयं ते यं चकृम सोऽयं योनिः पत्य उशती सुवासा जायेवार्वाचीनः परिवीतोऽस्तु, तत्र त्वं निषीद । हे स्वपाक प्रतीचीरिमा उ ते भक्ता भवन्तु ॥ २ ॥

भावार्थः—अत्रोपमालं०—राज्ञेदृशं गृहं निर्मातव्यं यत्पतिव्रता सुन्दरी हृद्या जायावत्सर्वेष्वृतुषु सुखं दद्यात्। तत्राऽऽसीन ईदृशानि कर्माणि कुर्य्याद्यैस्तत्रप्रजा अनुरक्तास्स्युः ॥ २ ॥

पदार्थः—हे राजन् (वयम्) हम लोग (ते) आप के (यम्) जिस गृह को (चकृम) बनावें सो (अयम्) यह (योनिः) गृह (पत्ये) स्वामी के लिये (उशती) कामना करती हुई (सुवासाः) सुन्दर वस्त्रों से शोभित (जायेव) मन की प्यारी स्त्री के सदृश (अर्वाचीनः) इस वर्त्तमानकाल में हुआ (परिवीतः) सब प्रकार व्याप्त उत्तम गुण जिस में ऐसा हो उस में आप (नि, सीद) निवास करो और हे (स्वपाक) उत्तम प्रकार परिपक्व ज्ञान वाले (प्रतीचीः) प्रतीति को प्राप्त होती हुई (इमाः) यह वर्त्तमान प्रजा (उ) ही (ते) आप के भक्त हों ॥ २ ॥

भावार्थः—इस मन्त्र में उपमालं०—राजा को चाहिये कि ऐसा गृह बनावे कि जो पतिव्रता सुन्दरी मन की प्यारी स्त्री के सदृश सब ऋतुओं में सुख देवे। और वहां स्थित हुआ ऐसे कर्म करे कि जिन कर्मों से अपनी प्रजा अनुरक्त होवें ॥ २ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को अगले मन्त्र में कहते हैं ॥

**आशृण्वते अदृपिताय मन्म नृचक्षसे सुमृळीकाय वेधः । देवाय शस्तिममृताय शंस ग्रावेव सोता मधुषुद्यमीळे ॥ ३ ॥**

आऽशृण्वते । अदृपिताय । मन्म । नृऽचक्षसे । सुऽमृळीकाय । वेधः । देवाय । शस्तिम् । अमृताय । शंस । ग्रावाऽइव । सोता । मधुऽसुत् । यम् । ईळे ॥ ३ ॥

पदार्थः—(आशृण्वते) समन्ताच्छ्रवणं कुर्वते (अदृपिताय) अमोहिताय (मन्म) विज्ञानम् (नृचक्षसे) सत्याऽसत्यकर्तॄणां जनानां साक्षाद्द्रष्ट्रे (सुमृळीकाय) सुसुखप्रदाय सुखस्वरूपाय (वेधः) मेधाविन् राजन् (देवाय) दिव्यगुणसम्पन्नाय (शस्तिम्) प्रशंसाम् (अमृताय) जलवच्छान्तस्वरूपाय (शंस) स्तुहि

( ग्रावेव ) मेघ इव ( सोता ) अभिषवस्य कर्त्ता ( मधुषुत् ) यो मधूनि मधुराणि सुनोति सः ( यम् ) ( ईळे ) स्तौमि ॥ ३ ॥

अन्वयः—हे वेधो राजन् यमहमीळ आशृण्वतेऽदपिताय नृचक्षसे सुमृळीकायाऽमृताय देवाय ते मन्माहमुपदिशेय तथा त्वं ग्रावेव मधुषुत्सोता सन्छस्तिं शंस ॥ ३ ॥

भावार्थः—स एव राजोत्तमो भवति यो मोहादिदोषरहितः सर्वेषां वचनानां श्रोता सत्याऽसत्ययोर्द्रष्टा मेघवत्प्रजायां विविधभोगप्रापको न्यायेशः स्यात् ॥ ३ ॥

पदार्थः—हे ( वेधः ) बुद्धिमान् राजन् ( यम् ) जिसकी मैं ( ईळे ) स्तुति करता हूं ( आशृण्वते ) सब प्रकार सुनते हुए ( अदपिताय ) मोहरहित ( नृचक्षसे ) सत्य और असत्य व्यवहारों को करते हुए जनों के साक्षात् देखने और ( सुमृळीकाय ) उत्तम प्रकार सुख देने वाले, सुख और ( अमृताय ) जल के सदृश शान्तस्वरूप ( देवाय ) उत्तम गुणों से युक्त आपके लिये ( मन्म ) विज्ञान का मैं उपदेश देता हूं वैसे आप ( ग्रावेव ) मेघ के सदृश ( मधुषुत् ) मधुरताओं के उत्पन्न करने वाले ( सोता ) अभिषेक करने वाले हुए ( शस्तिम् ) प्रशंसा की ( शंस ) स्तुति कीजिये अर्थात् प्रबन्ध से कहिये ॥ ३ ॥

भावार्थः—वह ही राजा उत्तम होता है कि जो मोह आदि दोषों से रहित होकर सब वचनों का सुनने, सत्य और असत्य का देखने और मेघ के सदृश प्रजा में अनेक प्रकार का भोग प्राप्त करानेवाला न्यायाधीश होवे ॥ ३ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ॥

**त्वं चिन्नः शम्या अग्ने अस्या ऋतस्य बोध्यृतचित्स्वाधीः ।**
**कदा त उक्था सधमाद्यानि कदा भवन्ति सख्या गृहे ते ॥ ४ ॥**

त्वम् । चित् । नः । शम्यै । अग्ने । अस्याः । ऋतस्य । बोधि । ऋतऽचित् । सुऽआधीः । कदा । ते । उक्था । सधऽमाद्यानि । कदा । भवन्ति । सख्या । गृहे । ते ॥ ४ ॥

पदार्थः—( त्वम् ) ( चित् ) अपि ( नः ) अस्माकम् ( शम्यै ) कर्मणे ( अग्ने ) पावकवद्वर्त्तमान ( अस्याः ) प्रजायाः ( ऋतस्य ) सत्यस्य ( बोधि ) बुध्यस्व

( ऋतचित् ) य ऋतं सत्यं चिनोति सः ( स्वाधीः ) यः सुष्ठु समन्ताच्चिन्तयति ( कदा ) ( ते ) तव ( उक्था ) उचितानि ( सधमाद्यानि ) सहस्थानेषु साधूनि ( कदा ) ( भवन्ति ) ( सख्या ) सखीनां कर्माणि भावा वा ( गृहे ) ( ते ) ॥ ४ ॥

अन्वयः—हे अग्ने राजंस्त्वं नोऽस्या ऋतस्य शर्म्यै स्वाधीर्ऋतचित्सन्कदा बोधि चिदपि ते गृहे सधमाद्यान्युक्था चिदपि ते सख्या कदा भवन्ति ॥ ४ ॥

भावार्थः—हे राजंस्त्वं यदा प्रजायाः सत्यं न्यायं करिष्यसि तदैव तवाऽऽज्ञायां वर्त्तित्वा प्रजा एकमत्या भविष्यन्ति ॥ ४ ॥

पदार्थः—हे ( अग्ने ) अग्नि के सदृश वर्त्तमान राजन् ( त्वम् ) आप ( नः ) हम लोगों की ( अस्याः ) इस प्रजा के ( ऋतस्य ) सत्य के ( शर्म्यै ) कर्म्म के लिये ( स्वाधीः ) उत्तम प्रकार सब प्रकार विचार करने और ( ऋतचित् ) सत्य का संग्रह करने वाला ( कदा ) कब ( बोधि ) जानो और ( चित् ) भी ( ते ) आपके ( गृहे ) गृह में ( सधमाद्यानि ) मेल के स्थानों में श्रेष्ठ और ( उक्था ) उचित भी ( ते ) तुम्हारे ( सख्या ) मित्रों के कर्म्म वा अभिप्राय ( कदा ) कब ( भवन्ति ) होते हैं ॥ ४ ॥

भावार्थः—हे राजन् आप जब प्रजा के सत्य न्याय को करेंगे तब ही आप की आज्ञा के अनुकूल वर्त्ताव करके प्रजा एकसम्मति से होंगी ॥ ४ ॥

अथोपदेशकविषयमाह ॥

अब उपदेशक वि० ॥

**कथा ह तद्वरु॑णाय॒ त्वम॑ग्ने॒ कथा दि॒वे ग॑र्हसे॒ कन्न॒ आगः॑ ।**
**कथा मि॒त्राय॑ मी॒ह्ळुषे॑ पृथि॒व्यै ब्रवः॒ कद॑र्य॒म्णे कद्भगा॑य ॥ ५ ॥ २० ॥**

कथा । ह । तत् । वरु॑णाय । त्वम् । अ॒ग्ने॒ । क॒था । दि॒वे । ग॒र्ह॒से॒ । कत् । नः॒ । आगः॑ । क॒था । मि॒त्राय॑ । मी॒ह्ळुषे॑ । पृ॒थि॒व्यै । ब्रवः॑ । कत् । अ॒र्य॒म्णे । कत् । भगा॑य ॥ ५ ॥ २० ॥

पदार्थः—( कथा ) केन प्रकारेण ( ह ) किल ( तत् ) ( वरुणाय ) श्रेष्ठाय ( त्वम् ) ( अग्ने ) पावकवद्वर्त्तमान ( कथा ) ( दिवे ) प्रकाशमानाय ( गर्हसे ) निन्दसि ( कत् ) कदा ( नः ) अस्माकम् ( आगः ) अपराधम् ( कथा ) ( मित्राय ) सख्ये

( मीह्ळुषे ) सुखवर्धकाय ( पृथिव्यै ) पृथिवीवद्वर्त्तमानायै स्त्रियै ( ब्रवः ) ब्रूयाः ( कत् ) कदा ( अर्यम्णे ) न्यायाधीशाय ( कत् ) कदा ( भगाय ) ऐश्वर्य्याय ॥ ५ ॥

अन्वयः—हे अग्ने त्वं ह कथा वरुणाय गर्हसे कथा दिवे गर्हसे न आगः कद् गर्हसे मीह्ळुषे मित्राय कथा गर्हसे पृथिव्यै तद्वचः कद् ब्रवोऽर्यम्णे भगाय च कद् ब्रवः ॥ ५ ॥

भावार्थः—हे विद्वांसो यदि राजा श्रेष्ठस्य, विदुषां वा निन्दां कुर्य्यात्तदैव भवद्भिर्निरोद्धव्यः सर्वेषां राजकर्म्मणां सिद्धये समयव्यवस्था कार्य्या यदा यदा यत् यत्कर्म कर्त्तव्यं भवेत्तदा तदा तत्तत्कर्म्म कर्त्तव्यमिति राजोपदेष्टव्यो यदा मित्रद्रोहमाचरेत्तदैव शिक्षणीय एवं कृते राजप्रजयोः सततमुन्नतिर्भवेत् ॥ ५ ॥

पदार्थः—हे ( अग्ने ) अग्नि के सदृश वर्त्तमान ( त्वम् ) आप ( ह ) ही ( कथा ) किस प्रकार ( वरुणाय ) श्रेष्ठ की ( गर्हसे ) निन्दा करते हो ( कथा ) किस प्रकार ( दिवे ) प्रकाशमान के लिये निन्दा करते हो ( नः ) हम लोगों के ( आगः ) अपराध की ( कत् ) कब निन्दा करते हो ( मीह्ळुषे ) सुख बढ़ाने वाले ( मित्राय ) मित्र के लिये ( कथा ) किस प्रकार निन्दा करते हो ( पृथिव्यै ) पृथिवी के सदृश वर्त्तमान स्त्री के लिये ( तत् ) उस वचन को ( कत् ) कब ( ब्रवः ) कहो ( अर्य्यम्णे ) न्यायाधीश के लिये और ( भगाय ) ऐश्वर्य्य के लिये ( कत् ) कब कहो ॥ ५ ॥

भावार्थः—हे विद्वानो जो राजा श्रेष्ठ वा विद्वानों की निन्दा करे वह आप लोगों से रोकने योग्य है और सब राजकर्मों की सिद्धि के लिये समयव्यवस्था करनी चाहिये और जब २ जो जो कर्म करना हो तब तब वह वह कर्म करना चाहिये इस प्रकार राजा को उपदेश करना चाहिये जब मित्रद्रोह का आचरण करे तभी उसको शिक्षा देनी चाहिये ऐसा करने पर राजा और प्रजा दोनों की निरन्तर उन्नति होवे ॥ ५ ॥

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को अगले मन्त्र में कहते हैं ॥

**कद्धिष्ण्यासु वृधसानो अग्ने कद्वाताय प्रतवसे शुभंये । परिज्मने नासत्याय क्षे ब्रवः कदग्ने रुद्राय नृघ्ने ॥ ६ ॥**

कत् । धिष्ण्यासु । वृधसानः । अग्ने । कत् । वाताय । प्रऽतवसे । शुभम्ऽये । परिऽज्मने । नासत्याय । क्षे । ब्रवः । कत् । अग्ने । रुद्राय । नृऽघ्ने ॥ ६ ॥

पदार्थः—( कत् ) कदा ( धिष्ण्यासु ) धिष्णायां बुद्धौ भवासु क्रियासु ( वृधसानः ) यो वृधान् वर्धकान् विभजति ( अग्ने ) विद्वन् राजन् ( कत् ) कदा ( वाताय ) विज्ञानाय ( प्रतवसे ) प्रकृष्टबलाय ( शुभंये ) यः शुभं याति प्राप्नोति तस्मै ( परिज्मने ) परितः सर्वतो ज्मा भूमिर्यस्य तस्मै ( नासत्याय ) अविद्यमानासत्याचाराय ( क्षे ) भूमी राज्याय विद्यते यस्मिंस्तस्मिन् । अत्रार्शादिभ्योऽच् ( ब्रवः ) ब्रूयाः ( कत् ) ( अग्ने ) पावकवद्देदीप्यमान ( रुद्राय ) दुष्टानां रोदयित्रे ( नृघ्ने ) यः शत्रूणां नायकान् हन्ति तस्मै ॥ ६ ॥

अन्वयः—हे अग्ने त्वं धिष्ण्यासु वृधसानः सन् प्रतवसे वाताय कद्ब्रवः । हे अग्ने परिज्मने शुभंये नासत्याय कद्ब्रवः क्षे नृघ्ने रुद्राय कद्ब्रवः ॥ ६ ॥

भावार्थः—राजादीनध्यक्षान् प्रत्यध्यापकोपदेशकमन्त्रिण एवमुपदिशेयुर्भवन्तो प्रज्ञाकर्म्मसु वृद्धा बलिष्ठाश्शुभाचरणाः सत्यभाषिणो दुष्टान् घातुकाः कदा भविष्यन्ति शुभाचरणे दुष्टाचारत्यागे विलम्बं मा कुर्वन्तु ॥ ६ ॥

पदार्थः—हे ( अग्ने ) अग्नि के सदृश प्रकाशमान आप ( धिष्ण्यासु ) बुद्धि में उत्पन्न क्रियाओं में ( वृधसानः ) बढ़ने वालों का विभाग करते हुए ( प्रतवसे ) श्रेष्ठ बल और ( वाताय ) विज्ञान के लिये ( कत् ) कब ( ब्रवः ) कहो हे ( अग्ने ) विद्वन् राजन् ( परिज्मने ) सब ओर भूमि जिसके उस ( शुभंये ) कल्याण को प्राप्त होने वाले ( नासत्याय ) असत्य आचरण से रहित के लिये ( कत् ) कब कहो ( क्षे ) पृथिवी राज्य के लिये विद्यमान जिसमें उस में ( नृघ्ने ) शत्रुओं के नायकों के नाश करने और ( रुद्राय ) दुष्ट पुरुषों को रुलाने वाले के लिये ( कत् ) कब कहो ॥ ६ ॥

भावार्थः—राजा आदि अध्यक्षों के प्रति अध्यापक उपदेशक और मन्त्रीजन ऐसा उपदेश देवें कि आप लोग बुद्धि के कामों में वृद्ध बलिष्ठ उत्तम आचरण वाले सत्यवादी और दुष्ट पुरुषों के नाश करने वाले कब होओगे और उत्तम आचरण करने और दुष्ट आचरण के त्याग में विलम्ब न करो ॥ ६ ॥

अथ शिष्यपरीक्षाविषयमाह ॥

अब विद्यार्थियों की परीक्षा वि० ॥

**कुथा मुहे पुष्टिम्भुराय पूष्णे कद्रुद्राय सुमखाय हविर्दे । कद्विष्णव उरुगायाय रेतो ब्रवः कदग्ने शरवे बृहत्यै ॥ ७ ॥**

कुथा । मुहे । पुष्टिम्ऽभुराय । पूष्णे । कत् । रुद्राय । सुऽमखाय । हविःऽदे । कत् । विष्णवे । उरुऽगायाय । रेतः । ब्रवः । कत् । अग्ने । शरवे । बृहत्यै ॥ ७ ॥

पदार्थः—( कथा ) केन प्रकारेण ( महे ) महते ( पुष्टिम्भराय ) ( पूष्णे ) पोषकाय ( कत् ) कदा ( रुद्राय ) शत्रुघ्नाय ( सुमखाय ) सुष्ठु यज्ञसम्पादकाय ( हविर्दे ) यो हवींषि दातव्यानि ददाति तस्मै ( कत् ) कदा ( विष्णवे ) व्यापकाय परमेश्वराय ( उरुगायाय ) बहुप्रशंसाय ( रेतः ) उदकमिव शान्तो मृदुर्भूत्वा ( ब्रवः ) ( कत् ) ( अग्ने ) विद्वन् ( शरवे ) दुष्टानां हिंसकाय ( बृहत्यै ) महत्यै सेनायै ॥ ७ ॥

अन्वयः—हे अग्ने त्वं रेत इव सन् महे पुष्टिम्भराय पूष्णे कथा ब्रवः सुमखाय हविर्दे रुद्राय कद्ब्रवः । उरुगायाय विष्णवे कद्ब्रवः शरवे बृहत्यै कद्ब्रवः ॥ ७ ॥

भावार्थः—अध्यापकैर्विद्यार्थिनोऽध्याप्य प्रत्यष्टाऽहं प्रतिपक्षं प्रतिमासं प्रत्ययनं प्रतिवर्षञ्च तेषां परीक्षा यथार्हा कर्त्तव्या येन राजकुमारादयः सर्वे निर्भ्रमज्ञानाः सन्तः सुशीलाः शरीरात्मबलयुक्ता धर्मिष्ठाः शतायुषो न्यायेन राज्यपालकाः स्युः ॥ ७ ॥

पदार्थः—हे ( अग्ने ) विद्वन् पुरुष आप ( रेतः ) जल के सदृश शान्त अर्थात् कोमलचित्त होके ( महे ) बड़े ( पुष्टिम्भराय ) पुष्टि धारण कराने ( पूष्णे ) पोषण करने वाले के लिये ( कथा ) किस प्रकार ( ब्रवः ) कहो ( सुमखाय ) उत्तम प्रकार यज्ञसम्पादन करने और ( हविर्दे ) देने योग्य वस्तुओं को देने वाले के लिये तथा ( रुद्राय ) शत्रुओं में प्रबल के लिये ( कत् ) कब कहो ( उरुगायाय ) बहुत प्रशंसा करने योग्य ( विष्णवे ) व्यापक परमेश्वर के लिये ( कत् ) कब कहै ( शरवे ) दुष्टों के नाश करने वाली ( बृहत्यै ) बड़ी सेना के लिये ( कत् ) कब कहो ॥ ७ ॥

भावार्थः—अध्यापक लोगों को विद्यार्थियों को पढ़ा के प्रत्येक अठवाड़े प्रत्येक पक्ष प्रतिमास प्रतिछमाही और प्रतिवर्ष परीक्षा यथायोग्य करनी चाहिये जिस से कि

राजकुमारादि सब भ्रमरहित ज्ञानविशिष्ट उत्तमस्वभावयुक्त शरीर और आत्मा के बल सहित धर्मिष्ठ सौ वर्ष जीने और न्याय से राज्य के पालन करने वाले होवें ॥ ७ ॥

अथ राजविषयमाह ॥

अब अगले मन्त्र में राजविषय को० ॥

**कथा शर्धाय मरुतामृताय कथा सूरे बृहते पृच्छ्यमानः । प्रति ब्रवोऽदितये तुराय साधा दिवो जातवेदश्चिकित्वान् ॥ ८ ॥**

कथा । शर्धाय । मरुताम् । ऋताय । कथा । सूरे । बृहते । पृच्छ्यमानः । प्रति । ब्रवः । अदितये । तुराय । साध । दिवः । जातऽवेदः । चिकित्वान् ॥ ८ ॥

पदार्थः—( कथा ) ( शर्धाय ) बलाय ( मरुताम् ) वायूनामिव ( ऋताय ) सत्याय ( कथा ) ( सूरे ) सूर्य्य इव वर्त्तमाने सैन्ये ( बृहते ) वर्द्धमानाय ( पृच्छ्यमानः ) ( प्रति ) ( ब्रवः ) ब्रूयाः ( अदितये ) अविनश्वरायाऽन्तरिक्षाय ( तुराय ) त्वरमाणाय ( साध ) । अत्र द्व्यचोतस्तिङ इति दीर्घः ( दिवः ) प्रकाशान् ( जातवेदः ) प्रसिद्धप्रज्ञान ( चिकित्वान् ) ज्ञानवान् भूत्वा ॥ ८ ॥

अन्वयः—हे जातवेदः सूरे पृच्छ्यमानस्त्वं मरुतामिवर्ताय बृहते शर्धाय कथा ब्रवः तुरायाऽदितये कथा प्रति ब्रवश्चिकित्वान्सन् दिवः साध ॥ ८ ॥

भावार्थः—अत्र वाचकलु०—ये राजानो वायुवत्स्वबलं वर्धयन्ति योधॄणां शिक्षकान् परीक्षकान् सत्कुर्वन्ति प्रश्नोत्तराभ्यां सर्वान् विज्ञाय तैः कार्य्याणि साध्नुवन्ति ते सूर्य्य इवैश्वर्य्यप्रकाशका भवन्ति ॥ ८ ॥

पदार्थः—हे ( जातवेदः ) प्रसिद्ध उत्तम ज्ञानयुक्त ( सूरे ) सूर्य्य के सदृश वर्त्तमान सेना में ( पृच्छ्यमानः ) पूंछे गए आप ( मरुताम् ) पवनों का जैसे वैसे ( ऋताय ) सत्य के और ( बृहते ) बढ़ते हुए ( शर्धाय ) बल के लिये ( कथा ) किस प्रकार से ( ब्रवः ) कहो ( तुराय ) शीघ्रता करते हुए (अदितये ) नहीं नाश होने वाले अन्तरिक्ष के लिये ( कथा ) किस प्रकार से ( प्रति ) निश्चित कहो ( चिकित्वान् ) ज्ञानवान् होकर ( दिवः ) प्रकाशों को ( साध ) सिद्ध करो ॥ ८ ॥

**भावार्थः**—इस मन्त्र में वाचकलु०—जो राजा लोग वायु के सदृश अपने बल को बढ़ाते, योधा लोगों के शिक्षक और परीक्षकों का सत्कार करते और प्रश्नोत्तर से सब को जान धन के द्वारा कार्य्य सिद्ध करते हैं वे सूर्य्य के सदृश ऐश्वर्य्य के प्रकाशक होते हैं ॥ ८ ॥

अथ मनुष्यैर्ब्रह्मचर्य्यादिना पुरुषार्थः संसेव्य इत्याह ॥

अब मनुष्यों को ब्रह्मचर्य्य आदि से पुरुषार्थ सेवना चाहिये इस वि० ॥

**ऋतेन॑ ऋ॒तं निय॑तमीळ॒ आ गोरा॒मा सचा॒ मधु॑मत्प॒क्वम॑ग्ने ।**
**कृ॒ष्णा स॒ती रुश॑ता धा॒सिनै॒षा जाम॑र्येण॒ पय॑सा पीपाय ॥ ९ ॥**

ऋ॒तेन॑ । ऋ॒तम् । नि॒ऽय॑तम् । ई॒ळे॒ । आ । गोः । आ॒मा । सचा॑ । मधु॑ऽमत् । प॒क्वम् । अ॒ग्ने॒ । कृ॒ष्णा । स॒ती । रुश॑ता । धा॒सिना॑ । ए॒षा । जाम॑र्य्येण । पय॑सा । पी॒पा॒य॒ ॥ ९ ॥

**पदार्थः**—( ऋतेन ) सत्येन ( ऋतम् ) सत्यम् ( नियतम् ) निश्चितम् ( ईळे ) स्तौम्यध्यन्विच्छामि ( आ ) ( गोः ) पृथिव्या वाण्या वा ( आमा ) अपरिपक्वम् । अत्र विभक्तेराकारादेशः ( सचा ) प्रसङ्गेन ( मधुमत् ) प्रशस्तमधुरादिगुणयुक्तम् ( पक्वम् ) ( अग्ने ) ( कृष्णा ) श्यामा ( सती ) ( रुशता ) सुस्वरूपेण ( धासिना ) अन्नेन ( एषा ) ( जामर्य्येण ) जामस्येदं जामं तद्दच्छति येन तेन ( पयसा ) दुग्धेन ( पीपाय ) वर्द्धस्व ॥ ९ ॥

**अन्वयः**—हे अग्ने विद्वन् यथाऽहं गोर्ऋतेन नियतमृतमीळे तथाऽऽचरँस्त्वं पृथिव्या मध्ये सचा मधुमदामा पक्वं चापीपाय । यथैषा कृष्णा सती विदुषी पतिव्रता रुशता जामर्येण पयसा धासिना वर्धते तथा त्वं वर्धस्व ॥ ९ ॥

**भावार्थः**—अत्र वाचकलु०—ये मनुष्या ब्रह्मचर्य्येण विद्यासुशिक्षे प्राप्य धर्म्येण व्यवहारेण धर्ममन्विष्य जितेन्द्रियत्वेन मिताऽऽहारा भूत्वा पुरुषार्थयन्ति ते द्यौ दम्पती इवाऽऽनन्दिता भूत्वा सर्वतो वर्धन्ते ॥ ९ ॥

**पदार्थः**—हे ( अग्ने ) अग्नि के सदृश प्रकाशमान विद्वान् पुरुष जिस प्रकार से मैं ( गोः ) पृथिवी वा वाणी के ( ऋतेन ) सत्य से ( नियतम् ) नियमयुक्त ( ऋतम् ) सत्य की ( ईळे ) स्तुति वा ढूँढ करता हूं वैसे आचरण करते हुए आप पृथिवी के मध्य में ( सचा ) प्रसङ्ग से ( मधुमत् ) श्रेष्ठ मधुर आदि गुणों से

युक्त ( आमा ) कच्चे और ( पक्वम् ) पके पदार्थों की ( आ,पीपाय ) अच्छे प्रकार वृद्धि करो और जैसे ( एषा ) यह ( कृष्णा ) श्याम वर्ण ( सती ) सज्जन पण्डिता पतिव्रता स्त्री ( रुशता ) उत्तम स्वरूप से ( जामर्य्येण ) जीवन में निमित्त ( पयसा ) दुग्ध और ( धासिना ) अन्न से बढ़ती है वैसे आप वृद्धि को प्राप्त होओ ॥ ९ ॥

भावार्थः—इस मन्त्र में वाचकलु०—जो मनुष्य ब्रह्मचर्य्य से विद्या और उत्तम शिक्षा को प्राप्त होके और धर्मयुक्त व्यवहार से धर्म का अन्वेषण और इन्द्रियजित् होने से नियम से भोजन करने वाले होकर पुरुषार्थ करते हैं वे स्नेही स्त्री और पुरुष के सदृश आनन्दित होकर सब प्रकार वृद्धि को प्राप्त होते हैं ॥ ९ ॥

पुनः पुरुषार्थकर्त्तव्यतामाह ॥

फिर भी पुरुषार्थकर्त्तव्यता को० ॥

**ऋतेन॒ हि ष्मा॑ वृष॒भश्चि॑द॒क्तः पुमाँ॑ अ॒ग्निः पय॑सा पृष्ठ्ये॑न ।**
**अस्प॑न्दमानो अचरद्वयो॒धा वृषा॑ शु॒क्रं दु॑दुहे॒ पृश्नि॒रूधः॑ ॥ १० ॥ २१ ॥**

ऋ॒तेन॑ । हि । स्म॒ । वृ॒ष॒भः । चि॒त् । अ॒क्तः । पुमा॑न् । अ॒ग्निः । पय॑सा । पृ॒ष्ठ्ये॑न । अस्प॑न्दमानः । अ॒च॒र॒त् । व॒यः॒ऽधाः । वृषा॑ । शु॒क्रम् । दु॒दु॒हे॒ । पृश्निः॑ । ऊधः॑ ॥ १० ॥ २१ ॥

पदार्थः—( ऋतेन ) सत्येन व्यवहारेण ( हि ) यतः ( स्म ) एव ( वृषभः ) बलिष्ठः ( चित् ) अपि ( अक्तः ) शुभगुणैर्युक्तः ( पुमान् ) पुरुषार्थी ( अग्निः ) विद्युदिव ( पयसा ) रात्र्या ( पृष्ठ्येन ) पृष्ठे भवेन दिनेन ( अस्पन्दमानः ) किञ्चिदप्यचलितस्सन् ( अचरत् ) चरति ( वयोधाः ) यः कमनीयानि वयांसि जीवनधनादीनि दधाति सः ( वृषा ) सुखानां वर्षकः ( शुक्रम् ) वीर्य्यम् ( दुदुहे ) पिपूर्त्ति ( पृश्निः ) अन्तरिक्षम् ( ऊधः ) रात्रिरिव ॥ १० ॥

अन्वयः—हे राजन् हि यतो भवान् ऋतेन वृषभोऽक्तः पयसाऽग्निरिव पृष्ठ्येन पुमानस्पन्दमानो वयोधा वृषा सन्नचरत् पृश्निरूधरिव स चिच्छुक्रं स्म दुदुहे ॥ १० ॥

भावार्थः—अत्र वाचकलु०—हे मनुष्या यथा पृथिव्या अर्द्धे भागे विद्युत् सूर्य्यरूपेण विराजतेऽपरे भागे रात्रावप्यन्तर्हिता चरति तथैव शयनजागरणे नियमेन विधाय पुरुषार्थं कृत्वा वीर्य्यं वर्धयित्वा शतायुषस्सन्तः सर्वानानन्दयत ॥ १० ॥

पदार्थः—हे राजन् ( हि ) जिस से कि आप ( ऋतेन ) सत्य व्यवहार से ( वृषभः ) बलिष्ठ ( अक्तः ) उत्तम गुणों से युक्त ( पयसा ) रात्रि के साथ ( अग्निः ) अग्नि के समान ( पृष्ठ्येन ) पृष्ठभाग में होने वाले दिन में ( पुमान् ) पुरुषार्थी ( अस्पन्दमानः ) किंचित् चले हुए ( वयोधाः ) सुन्दर अवस्था जीवन और धनादिकों के धारण करने ( वृषा ) सुखों की वृष्टि करने वाले होते हुए ( अचरत् ) विचरते हैं ( पृश्निः ) अन्तरिक्ष ( ऊधः ) और रात्रि के सदृश ( चित् ) सो भी ( शुक्रम् ) वीर्य्य को ( स्म ) ही ( दुदुहे ) पूरा करते हैं ॥ १० ॥

भावार्थः—इस मंत्र में वाचकलु०—हे मनुष्यो ! जैसे पृथिवी के अर्द्धभाग में बिजुली सूर्य्यरूप से शोभित होती है और दूसरे भाग में रात्रि के समय छिपी हुई चलती है वैसे ही शयन और जागरण नियम से कर और पुरुषार्थ कर के वीर्य बढ़ाय के सौ वर्ष की अवस्थायुक्त हुए सब को आनन्द दीजिये ॥ १० ॥

अथ राजादिक्षत्रियेभ्य उपदेशमाह ॥

अब राजा आदि क्षत्रियों के लिये उपदेश अगले० ॥

ऋतेनाद्रिं व्यसन्भिदन्तः समङ्गिरसो नवन्त गोभिः । शुनं नरः परि षदन्नुषासमाविः स्वरभवज्जाते अग्नौ ॥ ११ ॥

ऋतेन । अद्रिम् । वि । असन् । भिदन्तः । सम् । अङ्गिरसः । नवन्त । गोभिः । शुनम् । नरः । परि । सदन् । उषसम् । आविः । स्वः । अभवत् । जाते । अग्नौ ॥ ११ ॥

पदार्थः—( ऋतेन ) जलेन सह वर्त्तमानम् ( अद्रिम् ) मेघम् ( वि ) ( असन् ) प्रक्षिपन्ति ( भिदन्तः ) विदारयन्तः ( सम् ) ( अङ्गिरसः ) वायवः ( नवन्त ) प्रशंसत ( गोभिः ) किरणैरिव वाग्भिः ( शुनम् ) सुखम् ( नरः ) नेतारः सन्तः ( परि ) ( सदन् ) परिषीदन्ति ( उषसम् ) प्रभातम् ( आविः ) प्राकट्ये ( स्वः ) सूर्य्यः ( अभवत् ) भवति ( जाते ) उत्पन्ने ( अग्नौ ) ॥ ११ ॥

अन्वयः—हे नरो विद्वांसो यथा गोभिरङ्गिरस ऋतेन सहितमद्रिं सम्भिदन्तो व्यसन्नुषसं परिषदञ्जातेऽग्नौ स्वराविरभवत्तथा शुनं नवन्त ॥ ११ ॥

भावार्थः—अत्र वाचकलुप्तोपमालङ्कारः—ये राजादयो वीरा क्षत्रिया यथा वायुयुक्ता विद्युतो मेघं व्यस्तं कृत्वा विदीर्य्य भूमौ निपात्य सर्वान्सुखयन्ति विद्युतं विला-

ज्य सूर्य्यं जनयन्ति तथैव दुष्टान् विनाश्य न्यायं प्रकाश्य प्रज्ञां विलोड्य विद्याञ्जनयित्वा भानुरिव प्रकाशमानाः सन्तोऽतुलं सुखमाप्नुवन्तु ॥ ११ ॥

पदार्थः—हे ( नरः ) नायक होते हुए विद्वान् लोगो ! जैसे ( गोभिः ) किरणों के सदृश वाणियों से ( अङ्गिरसः ) पवन ( ऋतेन ) जल के सहित वर्त्तमान ( अद्रिम् ) मेघ के ( सम्, भिदन्तः ) अच्छे प्रकार टुकड़े करते हुए ( वि, असन् ) विविध प्रकार से फेंकते हैं ( उषसम् ) और प्रातःकाल को ( परि,सदन् ) प्राप्त होते हैं वा ( जाते ) उत्पन्न हुए ( अग्नौ ) अग्नि में (स्वः) सूर्य्य ( आविः ) प्रकट ( अभवत् ) होता है वैसे ( शुनम् ) सुख की ( नवन्त ) प्रशंसा करो ॥ ११ ॥

भावार्थः—इस मन्त्र में वाचकलुप्तोपमालङ्कार है —जो राजा आदि वीर क्षत्रिय जैसे पवन से युक्त बिजुलियां मेघ को उधर उधर चलाय और तोड़ पृथिवी पर गिरा के सब को सुख देती हैं और दूसरी बिजुली का विलोडन करके सूर्य्य को उत्पन्न करती हैं वैसे ही दुष्ट पुरुषों का नाश और न्याय का प्रकाश, बुद्धि का विलोडन और विद्या को उत्पन्न कर के सूर्य्य के सदृश प्रकाशमान हुए अतुल सुख को प्राप्त होओ ॥ ११ ॥

अथ सङ्गदोषादोषौ रक्षणविषयञ्चाह ॥

अब सङ्गदोष, अदोष और रक्षाविषय को० ॥

**ऋतेन देवीरमृता अमृक्ता अर्णोभिरापो मधुमद्भिरग्ने । वाजी न सर्गेषु प्रस्तुभानः प्र सदमित्स्रवितवे दधन्युः ॥ १२ ॥**

ऋतेन । देवीः । अमृताः । अमृक्ताः । अर्णःऽभिः । आपः । मधुमत्ऽभिः । अग्ने । वाजी । न । सर्गेषु । प्रऽस्तुभानः । प्र । सदम् । इत् । स्रवितवे । दधन्युः ॥ १२ ॥

पदार्थः—( ऋतेन ) सत्येन ( देवीः ) दिव्याः ( अमृताः ) कारणरूपेण नाशरहिताः ( अमृक्ताः ) अशोधिताः ( अर्णोभिः ) जलैः ( आपः ) प्राणाः ( मधुमद्भिः ) बहुभिर्मधुरादिगुणयुक्तैः ( अग्ने ) विद्वन् ( वाजी ) बहुन्नवान् ( न ) इव ( सर्गेषु ) सृष्टेषु कार्येषु ( प्रस्तुभानः ) प्रकर्षेण धरन् ( प्र ) ( सदम् ) प्राप्तं वस्तु ( इत् ) एव ( स्रवितवे ) स्रोतुं गन्तुम् ( दधन्युः ) धरन्त । अत्र वाच्छन्दसीति नुडागमो यासुडभावः ॥ १२ ॥

अन्वयः—हे अग्ने यथर्त्तेन मधुमद्भिरर्णोभिस्सहाऽमृक्ता देवीरमृता आपो स्रवितवे सदं प्रदधन्युस्तथेदेव सर्गेषु वाजी न प्रस्तुभानः सँस्त्वं भव ॥ १२ ॥

भावार्थः—अत्रोपमावाचकलु०—हे मनुष्या यथा शुद्धा आपः सुखकारिण्योऽशुद्धा दुःखप्रदा भवन्ति तथैव शुभगुणसङ्ग आनन्दप्रदो दोषसङ्गो दुःखप्रदश्च भवति । यथैश्वर्य्यवान् धार्मिको जनः कृपया बुभुक्षितादीन् पालयति तथैव सज्जनाः सर्वान् रक्षन्ति ॥ १२ ॥

पदार्थः—हे (अग्ने) विद्वान् पुरुष जैसे (ऋतेन) सत्य से (मधुमद्भिः) बहुत मधुर आदि गुणों से युक्त (अर्णोभिः) जलों के साथ (अमृक्ताः) नहीं शुद्ध किये गए (देवीः) उत्तम श्रेष्ठ (अमृताः) कारणरूप से नाशरहित (आपः) प्राणरूप पवन (स्रवितवे) जाने को (सदम्) प्राप्त वस्तु (प्र, दधन्युः) धारण करते हैं वैसे (इत्) ही (सर्गेषु) किये हुए कार्य्यों में (वाजी) बहुत अन्न वाले के (न) सदृश (प्रस्तुभानः) अत्यन्त धारण करते हुए आप प्रकट हूजिये ॥१२॥

भावार्थः—इस मन्त्र में उपमावाचकलु०—हे मनुष्यो जैसे शुद्ध जल सुखकारी और अशुद्ध दुःख देने वाले होते हैं वैसे ही उत्तम गुणों का सङ्ग आनन्ददायक और दोषों का सङ्ग दुःख देने वाला होता है। और जैसे ऐश्वर्य्ययुक्त धार्मिकजन कृपा से बुभुक्षित आदि का पालन करता है वैसे ही सज्जन लोग सब की रक्षा करते हैं ॥ १२ ॥

बुद्धिमत्ताविषयमाह ॥

अब बुद्धिमानों के बुद्धिमत्ताविषय को० ॥

**मा कस्य॑ यक्षं सद॒मिद्धु॒रो गा मा वे॒शस्य॑ प्रमिन॒तो मापेः ।**
**मा भ्रातु॑रग्ने॒ अनृ॑जोर्ऋ॒णं वे॒र्मा सख्यु॒र्दक्षं॑ रि॒पोर्भु॑जेम ॥ १३ ॥**

मा । कस्य॑ । य॒क्षम् । सद॑म् । इत् । हु॒रः । गाः । मा । वे॒शस्य॑ । प्र॒ऽमि॒न॒तः । मा । आ॒पेः । मा । भ्रातुः॑ । अ॒ग्ने॒ । अनृ॑जोः । ऋ॒णम् । वेः॒ । मा । सख्युः॑ । दक्ष॑म् । रि॒पोः । भु॒जे॒म ॥ १३ ॥

पदार्थः—(मा) (कस्य) (यक्षम्) सङ्गन्तव्यम् (सदम्) वस्तु (इत्) एव (हुरः) कुटिलस्य (गाः) प्राप्नुयाः (मा) (वेशस्य) प्रवेशस्य (प्रमिनतः)

प्रकर्षेण हिंसतः ( मा ) ( आपेः ) प्राप्तस्य ( मा ) ( भ्रातुः ) बन्धोः ( अग्ने ) अग्निरिव प्रकाशमान ( अनृजोः ) कुटिलस्य ( ऋणम् ) ( वेः ) प्राप्नुयाः ( मा ) ( सख्युः ) मित्रस्य ( दक्षम् ) बलम् ( रिपोः ) शत्रोः ( भुजेम ) अभ्यवहरेम ॥ १३ ॥

**अन्वयः**—हे अग्ने त्वमनृजोः कस्यचित्प्रमिनतो वेशस्य हुरस्सदं मा गाः । अनृजोरापेर्य्यत्तं सदं मा गा अनृजोर्भ्रातुर्यत्तं सदं मा गाः । अनृजोः सख्युर्दक्षं मा वेरनृजो रिपोर्ऋणं मा वेः । येन वयं सुखमिद्भुजम ॥ १३ ॥

**भावार्थः**—त एव धीमन्तो विज्ञेया येऽन्यायेन कस्यचिद्वस्तु दुष्टवेशं हिंसकसङ्गं न्यायेन प्राप्तस्य धनस्याऽन्यथा व्ययं दुष्टबन्धोः सङ्गं शत्रुविश्वासमकृत्वाऽऽनन्दं भुञ्जीरन् ॥ १३ ॥

**पदार्थः**—हे ( अग्ने ) अग्नि के सदृश प्रकाशमान आप ( अनृजोः ) कुटिल ( कस्य ) किसी ( प्रमिनतः ) अत्यन्त हिंसा करने वाले ( वेशस्य ) प्रवेश के ( हुरः ) कुटिलकार्यसम्बन्धी ( सदम् ) वस्तु को ( मा ) मत ( गाः ) प्राप्त होओ और कुटिल ( आपेः ) प्राप्त हुए के ( यक्षम् ) प्राप्त होने योग्य वस्तु को ( मा ) मत प्राप्त होओ कुटिल ( भ्रातुः ) बन्धु के प्राप्त होने योग्य वस्तु को ( मा ) मत प्राप्त होओ कुटिल ( सख्युः ) मित्र के ( दक्षम् ) बल को ( मा ) मत ( वेः ) प्राप्त होओ कुटिल ( रिपोः ) शत्रु के ( ऋणम् ) ऋण को ( मा ) मत प्राप्त होओ जिससे हम लोग सुख का ( इत् ) ही ( भुजेम ) व्यवहार करें ॥ १३ ॥

**भावार्थः**—उन्हीं लोगों को बुद्धिमान् समझना चाहिये कि जो अन्याय से किसी का वस्तु दुष्टवेश हिंसा करनेवाले का संग न्याय से प्राप्त हुए धन का व्यर्थ खर्च दुष्ट बन्धु का संग और शत्रु का विश्वास नहीं करके आनन्द का भोग करें ॥ १३ ॥

अथ राज्यपालनविषयमाह ॥

अब राज्यपालन विषय को अगले० ॥

**रक्षा णो अग्ने तव रक्षणेभी रारक्षाणः सुमख प्रीणानः ।**
**प्रति स्फुर वि रुज वीड्वंहो जहि रक्षो महि चिद्वावृधानम् ॥ १४ ॥**

रक्ष । नः । अग्ने । तव । रक्षणेभिः । ररक्षाणः । सुऽमख । प्रीणानः । प्रति । स्फुर । वि । रुज । वीळु । अंहः । जहि । रक्षः । महि । चित् । ववृधानम् ॥ १४ ॥

पदार्थः—( रक्ष ) पालय । अत्र द्व्यचोतस्तिङ इति दीर्घः ( नः ) अस्मान् ( अग्ने ) राजन् ( तव ) ( रक्षणेभिः ) अनेकविधैरुपायैः ( रारक्षाणः ) भृशं रक्षन्त्सन् ( सुमख ) सुष्ठुन्यायव्यवहारपालक ( प्रीणानः ) प्रसन्नः प्रसादयन् ( प्रति ) ( स्फुर ) पुरुषार्थय ( वि ) ( रुज ) प्रभग्नं कुरु ( वीळु ) दृढम् ( अंहः ) पापम् ( जहि ) ( रक्षः ) दुष्टं शत्रुम् ( महि ) महान्तम् ( चित् ) अपि ( वावृधानम् ) भृशं वर्धमानम् ॥ १४ ॥

अन्वयः—हे सुमखाऽग्ने त्वं नो रक्ष महि वावृधानं रारक्षाणः प्रीणानः सन् प्रति स्फुर । शत्रुं वीळु विरुज अंहो जहि रक्षो विरुज यतस्तव चिद्रक्षणेभिर्वयं सुखिनः स्याम ।। १४ ।।

भावार्थः—त एव राजानः कीर्त्तिभाजो ये दुष्टानां दुष्टतां निवार्य्य श्रेष्ठानां श्रेष्ठतां वर्धयित्वा राज्यं सततं पितृवत्पालयेयुः ।। १४ ।।

पदार्थः—हे ( सुमख ) उत्तम न्याय व्यवहार के पालन करने वाले ( अग्ने ) राजन् आप ( नः ) हम लोगों की ( रक्ष ) रक्षा करो और ( महि ) बड़े ( वावृधानम् ) अत्यन्त वृद्धि को प्राप्त हुए की ( रारक्षाणः ) रक्षा करते (प्रीणानः) प्रसन्न होते वा प्रसन्न करते हुए ( प्रति, स्फुर ) पुरुषार्थ करो और शत्रु को ( वीळु ) दृढ़ ( वि, रुज ) विशेषता से अच्छे प्रकार भग्न करो और ( अंहः ) पाप का ( जहि ) नाश करो (रक्षः) दुष्ट शत्रु का भंग करो और जिस से ( तव ) आप के ( चित् ) भी ( रक्षणेभिः ) अनेक प्रकार के उपायों से हम लोग सुखी होवें ।।१४।।

भावार्थः—वे ही राजा लोग यश के भागी हैं कि जो दुष्ट पुरुषों की दुष्टता को दूर कर और श्रेष्ठ पुरुषों की श्रेष्ठता बढ़ा के राज्य का निरन्तर पिता के समान अर्थात् पिता अपने पुत्र की पालना करता वैसे पालन करें ।। १४ ।।

पुनस्तमेव विषयमाह ॥

फिर उसी विषय को० ।।

**एभिर्भव सुमना अग्ने अर्कैरिमान्त्स्पृश मन्मभिः शूर वाजान् ।**
**उत ब्रह्माण्यङ्गिरो जुषस्व सं ते शस्तिर्देववाता जरेत ।। १५ ।।**

एभिः । भव । सुऽमनाः । अग्ने । अर्कैः । इमान् । स्पृश । मन्मऽभिः ।

शूर । वाजान् । उत । ब्रह्माणि । अङ्गिरः । जुषस्व । सम् । ते । शस्तिः । देवऽवाता । जरेत ॥ १५ ॥

**पदार्थः**—( एभिः ) धार्मिकै रक्षकैर्विद्वद्भिः सह ( भव ) ( सुमनाः ) शोभनं मनो यस्य सः ( अग्ने ) विद्वन् ( अर्कैः ) सत्कर्त्तव्यैः ( इमान् ) ( स्पृश ) गृहाण ( मन्मभिः ) विद्वद्भिः ( शूर ) ( वाजान् ) प्राप्तव्याञ्छुभगुणकर्मस्वभावान् ( उत ) ( ब्रह्माणि ) महान्ति धनानि ( अङ्गिरः ) प्राण इव वर्त्तमान ( जुषस्व ) सेवस्व ( सम् ) ( ते ) तव ( शस्तिः ) प्रशंसा ( देववाता ) देवैर्विद्वद्भिः कृता ( जरेत ) प्रशंसिता भवेत् ॥ १५ ॥

**अन्वयः**—हे अङ्गिरः शूराग्ने राजंस्तमेभिरर्कैर्मन्मभिस्सह सुमना भवेमान्वाजान् स्पृश उत ब्रह्माणि सञ्जुषस्व यतस्ते देववाता शस्तिर्जरेत ॥ १५ ॥

**भावार्थः**—हे राजन्भवानाप्तानां विदुषां सङ्गं सततं कुरु तदुपदेशेन न्यायेन राज्यं पालयित्वा प्रशंसितो भवतु ॥ १५ ॥

**पदार्थः**—हे ( अङ्गिरः ) प्राण के सदृश वर्त्तमान ( शूर ) वीर ( अग्ने ) विद्वन् राजन् आप ( एभिः ) इन धार्मिक रक्षक और विद्यावान् ( अर्कैः ) सत्कार करने योग्य ( मन्मभिः ) विद्वानों के साथ ( सुमनाः ) उत्तम मन युक्त ( भव ) हूजिये और ( इमान् ) इन ( वाजान् ) प्राप्त होने योग्य उत्तम गुण कर्म और स्वभाव वालों को ( स्पृश ) ग्रहण करिये ( उत ) और ( ब्रह्माणि ) बड़े २ धनों का ( सम्,जुषस्व ) अच्छे प्रकार सेवन करिये जिस से कि ( ते ) आप की ( देववाता ) विद्वानों से की गई ( शस्तिः ) प्रशंसा ( जरेत ) प्रशंसित हो अर्थात् अधिक विख्यात हो ॥ १५ ॥

**भावार्थः**—हे राजन् आप यथार्थवक्ता विद्वानों का संग निरन्तर करिये और उन के उपदेश से न्यायपूर्वक राज्य का पालन करके प्रशंसित हूजिये ॥ १५ ॥

अथ प्रजाविषयमाह ॥

अब प्रजाविषय को० ॥

**एता विश्वा विदुषे तुभ्यं वेधो नीथान्यग्ने निण्या वचांसि । निवचना कवये काव्यान्यशंसिषं मतिभिर्विप्र उक्थैः ॥ १६ ॥ २२ ॥**

एता । विश्वा । विदुषे । तुभ्यम् । वेधः । नीथानि । अग्ने । निण्या । वचांसि । निऽवचना । कवये । काव्यानि । अशंसिषम् । मतिऽभिः । विप्रः । उक्थैः ॥ १६ ॥ २२ ॥

पदार्थः—( एता ) एतानि ( विश्वा ) सर्वाणि ( विदुषे ) ( तुभ्यम् ) ( वेधः ) मेधाविन् ( नीथानि ) प्रापितानि ( अग्ने ) राजन् ( निण्या ) निर्णीतानि ( वचांसि ) वचनानि ( निवचना ) नितरामुच्यन्तेऽर्था यैस्तानि ( कवये ) विक्रान्तप्रज्ञाय ( काव्यानि ) कविभिर्निर्मितानि ( अशंसिषम् ) प्रशंसेयम् ( मतिभिः ) विद्वद्भिस्सह ( विप्रः ) मेधावी ( उक्थैः ) प्रशंसितुमर्हैः ॥ १६ ॥

अन्वयः—हे वेधोऽग्ने विप्रोहमुक्थैर्मतिभिः सह यानि काव्यान्यशंसिषं तानि विश्वैता निण्या निवचना वचांसि विदुषे कवये तुभ्यं नीथानि प्रशंसेयम् ॥ १६ ॥

भावार्थः—सैव निश्चिता प्रशंसा वेदितव्या या धार्मिकैर्विद्वद्भिः क्रियेत, अध्यापकोपदेशकैरध्येतार उपदेश्याश्च सदैव सत्यवादिनो विद्वांसो विधातव्या इति ॥ १६ ॥

अत्राग्निराजप्रजादिकृत्यगुणवर्णनादेतदर्थस्य पूर्वसूक्तार्थेन सह सङ्गतिर्वेद्या ॥

इति तृतीयं सूक्तं द्वाविंशो वर्गश्च समाप्तः ॥

पदार्थः—हे ( वेधः ) बुद्धिमान् ( अग्ने ) राजन् ( विप्रः ) मेधावी जन मैं ( उक्थैः ) प्रशंसा करने योग्य ( मतिभिः ) विद्वानों के साथ जो ( काव्यानि ) कवियों ने रचे शास्त्र उन की ( अशंसिषम् ) प्रशंसा करता हूं और उन ( विश्वा ) सम्पूर्ण ( एता ) उन ( निण्या ) निर्णय किये गये ( निवचना ) अत्यन्त अर्थों को कहने वाले ( वचांसि ) वचनों को ( विदुषे ) विद्वान् ( कवये ) उत्तम बुद्धि वाले ( तुभ्यम् ) आप के लिये ( नीथानि ) प्राप्त किये गये प्रशंसूं अर्थात् वह आपको प्राप्त हुए ऐसी प्रशंसा करूं ॥ १६ ॥

भावार्थः—वही निश्चित प्रशंसा जानने योग्य है कि जो धार्मिक विद्वानों से की जाय अध्यापक और उपदेशक जनों को चाहिये कि पढ़ने और उपदेश देनेवालों को सदा ही सत्यवादी और विद्वान् करें ॥ १६ ॥

इस सूक्त में अग्नि, राज और प्रजादिकों के कृत्य और गुणों का वर्णन होने से इस सूक्त के अर्थ की पूर्व सूक्तार्थ के साथ संगति जाननी चाहिये ॥

यह तीसरा सूक्त और बाईसवां वर्ग समाप्त हुआ ॥

ओ३म्

अथ पञ्चदशर्चस्य चतुर्थस्य सूक्तस्य वामदेव ऋषिः। अग्नीरक्षो-
हा देवता । १।२।४।५।८ भुरिक् पङ्क्तिः । ६
स्वराट् पङ्क्तिः । १२ निचृत्पङ्क्तिश्छन्दः । पञ्चमः
स्वरः । ३ । १० । ११ । १५ निचृत्त्रिष्टुप् ।
६ विराट् त्रिष्टुप् । ७। १३ त्रिष्टुप्छन्दः ।
धैवतः स्वरः । १४ स्वराड् बृहती
छन्दः । मध्यमः स्वरः ॥

अथ राजविषये सेनापतिकृत्यमाह ॥

अब पन्द्रह ऋचा वाले चौथे सूक्त का आरम्भ है ॥
उस के प्रथम मन्त्र में राजविषय में सेनापति के काम को कहते हैं ॥

**कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन । तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः ॥ १ ॥**

कृणुष्व । पाजः । प्रऽसितिम् । न । पृथ्वीम् । याहि । राजाऽइव । अमऽवान् । इभेन । तृष्वीम् । अनु । प्रऽसितिम् । द्रूणानः । अस्ता । असि । विध्य । रक्षसः । तपिष्ठैः ॥ १ ॥

पदार्थः—( कृणुष्व ) ( पाजः ) बलम् ( प्रसितिम् ) प्रबद्धाम् ( न ) इव ( पृथ्वीम् ) भूमिम् ( याहि ) ( राजेव ) ( अमवान् ) बलवान् ( इभेन ) हस्तिना ( तृष्वीम् ) पिपासिताम् ( अनु ) ( प्रसितिम् ) बन्धनम् ( द्रूणानः ) शीघ्रकारी ( अस्ता ) प्रक्षेप्ता ( असि ) ( विध्य ) ( रक्षसः ) दुष्टान् ( तपिष्ठैः ) अतिशयेन सन्तापकैः शस्त्रादिभिः ॥ १ ॥

अन्वयः—हे सेनेश त्वं राजेवाऽमवानिभेन याहि प्रसितिं पृथ्वीं न पाजः कृणुष्व यतः प्रसितिं तृष्वीमनु द्रूणानोऽस्तासि तस्मात्तपिष्ठै रक्षसो विध्य ॥ १ ॥

भावार्थः—अत्रोपमालं०—हे राजजना यूयं पृथ्वीव दृढं बलं कृत्वा राजवन्न्यायाधीशा भूत्वा तृषितामृगीमनुधावन्वृक इव दुष्टान् दस्यूननुधावन्तस्तान् घ्नत ॥ १ ॥